No. ४३६१

Title योग सूत्र व्याख्या
पतञ्जल भाष्य विवरणं

Author ×

Extent २३ Age ×

Subject योग शास्त्रं

योगसूत्रव्याख्या पातञ्जलभाष्यविवरणम्

~~(पातञ्जलम्)~~

पत्र ७५

4379

F. 23

श्रीगणेशायनमः॥ ॥भवदेवादयः सर्व्वेनिवंधाः संतियद्यपि।तथापितेषामस्येह सत्यंप्रत्यसमत्त
रं।अथेह चतुर्णांपुरुषार्थेनसकललोकाभिमतानांधर्मार्थकाममोक्षाणांप्रथमनिर्द्दिष्टोधर्मएवप्रधा
नं।यस्मादर्थकाममोक्षास्ततएवप्रार्थ्यन्तेः तद्विज्ञानेचचतुर्दशशास्त्राण्युपायभूतेनपुराणन्यायमीमां
साधर्मशास्त्रांगमिश्रिताः।वेदाःस्थानानिविद्यानांधर्म्मस्यचचतुर्दशेत्यादियाज्ञवल्क्यादिवचन
प्रसिद्धानि।तत्राप्यन्यानित्रयोदशशास्त्राणिनमीमांसाविनाकस्मैचिदर्थायपर्याप्तानीत्यादर्शः
सर्व्वशास्त्राणामिप्यमीमांसेतिलोकानुग्रहायपरमकारुणिकोजैमिनिस्तांप्राणैषीत्॥ ॥अथा
तोधर्मजिज्ञासेत्यत्रप्रसिद्धाथशब्दस्यानंतर्याभिधायित्वेनसामर्थ्याद्ध्ययनानंतर्यमेवगम्यते।क
रिष्यमाणायावेदार्थविचारात्मिकायाधर्मजिज्ञासायाअध्ययनानंतरमेवसंभावात्॥ उक्तंचतत्रवेदा एम०
ध्ययनंतस्मिन्सतिहिसावकल्पतइति।किंपुनरस्याअध्ययनानंतर्योपदेशेप्रयोजनवेदमधीत्य

मुक्तिरिष्यते। अतोनिर्विषयंनित्यंमनःकार्यंमुमुक्षुणा। वनिरोद्धव्यंयावतद्धृदिगतंक्षयं।
एतज्ज्ञानंचध्यानंचशेषोन्योन्यायविस्तरः इत्यादिश्रुतिषु। मुक्तिर्योगात्तथायोगःसम्यग्ज्ञानान्म
हीयते॥ तपस्विभ्योधिकोयोगीज्ञानिभ्योपिमतोधिकइत्यादि रतिषुचयोगोमोक्षहेतुतयाविदि
तः तत्रयोगः किंस्वरूपः किमुपायः केनवाद्वारेणज्ञानमोक्षयोः कार इत्यादिकंमुमुक्षूणांविवि
त्सितंभवति ब्रह्ममीमांसासांख्यादिषुचज्ञानमेवविचारितंवाऽल्पेनज्ञानसाधनमात्रत्वयोगःसं
क्षेपतः। ज्ञानजन्ययोगस्तुसंक्षेपतोपितेषुनोक्तः। अतोतिविस्तरेणद्विविधंयोगंप्रतिपिपादयि
षुर्भगवान्पतंजलिः। शिष्यावधानायादौयोगानुशासनंशास्त्रमारभ्यतयाप्रतिज्ञातवान्॥ अ
थयोगानुशासनं॥ तदिदंसूत्रमारभ्यसमग्रंशास्त्रंसर्वलोकहितायभगवान्वादरायणोव्या
चष्टे। अथेत्ययमीधकारार्थइत्यादिनाअधिकारश योगारूढतयाआरंभणएवमुख्यइतिशा

पा० ज० सूत्रस्याधिकार्यत्वं मुख्यमेवास्ति यत्र चार्थस्याधिकार्यत्वं उच्यते यथा अथैष ज्योतिरित्यादौ तत्राधिका
॥२॥ र्यशास्त्रविषयतया गौणं तदित्याशयः एतेन शास्त्रस्यानधिकार्यत्वमनिरूप्यत्वादित्यपास्तं। प्र
कृतभाष्यविरोधादिति प्रश्नार्थकत्वमथशब्दस्य किं कुत्रापि नास्तीत्याशंकानिरासायोक्तम
2 यमिति। अधिकारार्थोधिकारवाचक इत्यर्थः अथशब्दस्य चोच्चारणमात्रेण मंगलत्वमविबोध्यं।
शिष्टस्य शासनमनुशासनं तेन शास्त्रस्य गुरुमूलकतया सूत्रकारेण प्रामाण्यं दर्शितं हिरण्यग
र्भो योगस्य वक्ता नान्यः पुरातन इति योगियान हिरण्यगर्भस्यादिगुरुत्वबोधनादिति। सूत्रवाक्या
र्थमुपसंहरति। योगस्यानुशासनं शास्त्रमधकृतं वेदितव्यमिति शिष्यैरिति शेषः। वेदितव्यमि
ति एतेन सूत्रस्य शिष्यावधानार्थकत्वं सूचितं। योगस्य फलं सूत्रभाष्ययोः स्थाने स्थाने वक्ष्यमा एम०
णं मयोत्तरसूत्रावतारिकायामपि संक्षेपाद्वक्ष्यते। योगः सैलक्षणपरतया द्वितीयसूत्रमवतारम ॥२॥

पिष्यतितत्रयुजसमाधावितियोगलक्षणस्यप्रसिद्धत्वाल्लक्षणांतराकांक्षैवनास्तीत्याशंकांत
स्याति।व्याप्तत्वेनादावपाकरोति।योगःसमाधिःसचसार्वभौमश्चित्तस्यधर्मइति।युतसमाधावित्य
नुशासनतःप्रसिद्धोयोगःसमाधिःचित्तवृत्तिनिरोधःसचसार्वभौमःसर्वासुवक्ष्यमाणासुक्षिप्ताद्य
वस्थासुसाधारणश्चित्तस्यधर्मःस्वाभाविकोजलस्येवद्रवत्ववत्।क्षिप्ताद्यवस्थायामपिहीषत्किंचिद्वृ
त्तिनिरोधोस्त्येवेति।तथाचालक्ष्यास्ववस्थासुतल्लक्षणमतिव्याप्तमितिशेषः।कास्ताःसर्वाश्चित्तभूम
यइत्याकांक्षायामाह।क्षिप्तमित्यादि।क्षिप्तंरजसाविषयेष्वेववृत्तिमत्।मूढंतमसानिद्रादिवृत्तिमत्।
क्षिप्ताद्विशिष्टंविक्षिप्तंसत्वाधिक्येनसमाधेरपिचित्तंरजोमात्रयांतरांतराविषयांतरवृत्तिमत्।
एकस्मिन्नेवविषयेअग्रंशिखायस्यचित्तदीपस्यसएकाग्रंविशुद्धसत्वतयैकस्मिन्नेवविषयेवक्ष्यमाण
वधीकृतकालपर्यंतमचंचलंनिवातस्थप्रदीपवत्।तथाचक्षिप्तादित्रयेपिकिंचिदेकाग्रत्वेपित

पा० ज० तत्रनातिप्रसंगः।निरुद्धंचनिरुद्धसकलवृत्तिकंसंस्कारमात्रशेषमित्यर्थः।रजोधर्मस्यरागादेः प्र
॥३॥ तिघातादेवलोकानांतमोधर्मोविषादादिर्दृश्यतइतिक्षिप्तात एवंनमूढस्योपन्यासः।उक्तामतिव्या
प्तिंप्रतिपादयितुमुक्तभूमिषुलक्ष्यालक्ष्यविभागंकरोतितत्रविक्षिप्तइत्यादिनातत्रतासुपंचसुमध्येवि
क्षिप्तेचेतसिवर्त्तमानःसमाधिरल्पोबहुलविक्षेपशेषीभूतत्वान्नयोगपक्षेयोगमध्येप्रविशतिक्ले
शहान्यादेर्हेतुत्वाभावात्तरसुतरांतुक्षिप्तमूढयोश्चित्तयोर्वर्त्तमानोसमाध्याभासावित्याशयः।अतोनक्षि
प्तमूढभूम्योरलक्ष्यत्वप्रतिपादनेनन्यूनतेति।विक्षिप्तमुखेनाद्यभूमित्रयस्यालक्ष्यत्वमुक्त्वाअं
त्यभूमिद्वयमेवलक्ष्यमित्याहयस्त्वेकाग्रइति।यस्तुसमाधिरेकाग्रेचेतसिवर्त्तमानोर्थध्येयंवस्तु
सद्भूतंपरमार्थभूतंप्रकर्षेणद्योतयतिसाक्षात्कारयतिमतश्चक्लेशानविद्यादीन्पंचक्षिणोति।त राम०
तोपिचकारणोच्छेदाद्धर्माधर्मरूपाणिबंधनानिबुद्धिपुरुषयोर्वैस्वकारणानिश्लथयति।अदृष्टा ॥३॥

स्यादनाक्षमाणिकरोति। तथा निरोधमसंप्रज्ञातयोगमभिमुखं प्रत्यासन्नं करोतीति परवैराग्यजन
नद्वारेति शेषः। स समाधिः संप्रज्ञातो योग इति कथ्यत इत्यर्थः। सम्यक् प्रज्ञायते साक्षात्क्रियते ध्ये
यमस्मिन्निति विशेषरूपे योगः। यद्यपि समाधिशब्देनैकाग्रतातिशयरूपं निरोधद्वयरूपयोग
द्वयस्यांगमेव परिभाषिष्यते। तथापि योगद्वयं अंगांगिनोरभेदविवक्षयैव समाधिशब्देनात्रोक्तं।
एवमुत्तरोत्तरसूत्रेष्वपि बोध्यं। स च संप्रज्ञातश्चतुर्विध इत्याह। स चेति। न च वितर्कानुगतादित्रि
के साक्षात्कारजनकत्वादिकं साक्षान्नास्ति अविद्यालेशसंपर्कादिति वाच्यं सवितर्कादिक्रमेणैव साक्षा
त्कारस्य द्वाचरमभूमिकायामृतंभरप्रज्ञोदयेन भूमिकाचतुष्टय एव साक्षात्कारसंबंधादिति।
निरूढभूमेरपि लक्षणमाह। सर्ववृत्तीति। संप्रज्ञातयोग इत्यर्थः। वृत्तिनिरोधश्च चित्तस्य वृत्ति
संस्कारशेषावस्था अभावस्याधिकरणावस्थाविशेषमात्ररूपत्वात्। निरुध्यन्तेऽस्यामवस्था

पा॰ज॰ यामितिव्युत्सन्तेर्वा। साचावस्थासंस्कारमात्रैः परिणामधारा। निरोधकालेसंस्कारतारतम्यरूपस्ये
।।४।। वचित्तपरिणामस्यसूत्रभाष्याभ्यांवक्ष्यमाणत्वादिति। ननुवृत्तिनिरोधोवृत्त्यभावमात्रंए
काग्रताविशेषोवानिरोधस्याभावमात्रत्वेवक्ष्यमाणसंस्कारजनकत्वानुपपत्तेः।। एकाग्रतामा
5 त्ररूपत्वेसमाधिरूपाङ्गात्संप्रज्ञाताच्चभेदानुपपत्तेः। उल्काहस्तोयथाकश्चिद्द्रव्यमालोक्यतां
त्यजेत्। बोधेनज्ञानमालोक्यतथाबोधंपरित्यजेदित्यादिस्मृतिषुयावद्दृग्गतंक्षयमितिपूर्वो
क्तश्रुतौचासंप्रज्ञातस्यसकलवृत्तिशून्यत्वश्रवणाच्चेति। ननुसंप्रज्ञातासंप्रज्ञातज्ञोतयो
र्निरोधरूपयोः किंप्रयोजनं। योगाङ्गानुष्ठानादशुद्धिक्षयेज्ञानदीप्तिराविवेकख्यातेरितिसूत्रेण
योगाङ्गस्यैवज्ञानहेतुतायावक्ष्यमाणत्वात्। संप्रज्ञातयोगकालेज्ञानस्योत्पत्तेरेवशास्त्रेष राम॰
वगमात्। ननुतद्धेतुतायाः। एककालकत्वेनहेतुहेतुमद्भावासंभवाच्च। अस्तुवाविषयांत ।।४।।

तत्संचारास्यप्रतिबंधनिवृत्तिरूपतयाज्ञानहेतुत्वंप्रज्ञातयोगस्यक्षीणवृत्तेरभिजातस्येवमणे
र्ग्रहीतृग्रहणग्राह्येषुतत्स्थतदंजनतासमापत्तिरित्यागामिसूत्राद्वनतुअसंप्रज्ञातयोग
स्यापि। तस्यज्ञानजन्यत्वात्। नचज्ञानोत्पत्त्यनंतरंमोक्षायान्यत्साधनमपेक्षणीयं। तस्यता
वदेवचिरंयावन्नविमोक्ष्येथसंपत्स्यइत्यादिश्रुतिभिरन्यनिरपेक्षज्ञानस्यमोक्षहेतुत्वसिद्धेः। अ
विद्याकामकर्मणांनिदाननिवृत्तौदेहत्वभावेनपुनःसंसारानुपपत्तेश्चेति। अत्रोच्यते। ज्ञानेजातेपिप्रा
रब्धकर्मणादेहधारणस्यावश्यकत्वेनतदानीमपिबाह्याभ्यंतरवृत्तिभिर्यदुःखंनजायतेएतदप्यंत
तोयोगद्वयस्यफलमस्ति। तथाहि वक्ष्यतिभाष्यकारः। सर्वाश्चैतावृत्तयःसुखदुःखमोहात्मिकाः। अ
नरागताःसर्वाश्चवृत्तयोनिरोद्धव्याइति। किंचज्ञानस्ययथाकर्मक्षयहेतुत्वमस्तितथायोगस्यापि।
निनिष्पन्नसमाधिस्तुमुक्तिंतत्रैवजन्मनि। प्राप्नोतियोगीयोगाग्निदग्धकर्मचयोचिरात्इत्या

पा०ज० दिवाक्यशतेभ्यः। तथाच कर्मक्षयद्वारा ज्ञानस्यैवासंप्रज्ञातयोगस्यापि मोक्षहेतुत्वं सिद्धं तत्र चा
॥१॥ संप्रज्ञातयोगेनाखिलसंस्कारदाहकेन प्रारब्धकर्माप्यतिक्रम्यत इति ज्ञानाद्विशेषः। ज्ञानस्य
नस्य हि प्रारब्धनाशकत्वे वाधिकास्ति तस्य तावदेव चिरमित्यादिश्रुतिर्जीवन्मुक्तश्रुतिस्मृत
5 पश्चायोगस्य तु प्रारब्धनाशकत्वे बाधकं नास्ति प्रत्युत दग्धकर्मचयो चिरादित्येव स्मर्यते अतः
प्रारब्धमपि कर्म कर्मविपाकोक्तप्रायश्चित्तादिवदेवातिक्रम्य झटिति मोचनमेव योगस्य फलं।
तदुक्तं मोक्षधर्मे। नास्ति सांख्यसमं ज्ञानं नास्ति योगसमं बलमिति। बलं प्रारब्धस्याप्यतिक्र
मेण स्वेच्छया शीघ्रमोक्षहेतुः। अपिच वृत्तिनिरोधात्मको योग एव दुःखनिवृत्त्यात्मकमोक्षे सा
क्षाद्धेतुः पुरुषे दुःखस्य चित्तवृत्त्यौपाधिकत्वात् उपाधिनिवृत्तिश्चौपाधिकनिवृत्तौ चरमकारणं। एम०
अतो ज्ञानेन न योगस्यान्यथासिद्धिः ज्ञानवैराग्यकर्मक्षयादीनां वृत्तिनिरोधाख्यचरमकार ॥५॥

ण द्वारैव इत्यात्संतोच्छेदहेतुत्वात्। वृत्त्यसंतनिरोधस्तु चरमासंप्रज्ञाते भवति यत्र संस्कारस्याप्यत
त्क्षयेण चित्तस्य विलयात्मोक्षो भवतीति तथा च द्वारद्वारिभावेनापि ज्ञानस्यैवासंप्रज्ञातयोगस्यापि
मोक्षहेतुत्वं सिद्धं। असंप्रज्ञातयोगस्य च साक्षान्मोक्षहेतुत्वं तदा द्रष्टुः स्वरूपेऽवस्थानमिति सूत्र
कारः स्वयं वक्ष्यति। मुक्तिर्हित्वान्यथाभावं स्वरूपेण व्यवस्थितिरित्यादिवाक्यैरात्यंतिकस्य स्वरूपाव
स्थानस्यैव मोक्षत्वादिति दिक्। तदेवं चित्तभूमिषु लक्ष्यालक्ष्यविवेकपूर्वकं प्रसिद्धस्य योगलक्ष
स्यास्येति व्याप्तिं प्रदर्श्य योगलक्षणाकांक्षोपपादिता। अतः परं लक्षणपूर्वतयोत्तरसूत्रमवतारय
ति तस्य लक्षणमभिधित्सयेति। तस्य द्विविधस्य योगस्य उक्तातिव्याप्तिनिराकरणान्यथानुपप
त्त्या सूत्रद्वयेनैव लक्षणसमाप्तिर्भविष्यतीति सूचयितुमभिधित्सयेत्युक्तं। अन्यथादितस्य ल
क्षणसूत्रं प्रवहत इत्येतावन्मात्रमुच्येत। योगश्चित्तवृत्तिनिरोधः। चित्तमंतःकरणसामान्यं ए

पा० जं०
॥६॥

कस्यैवांतःकरणस्य वृत्तिभेदमात्रेण चतुर्धात्र दर्शने विभागात्। तस्य यावक्ष्यमाणा वृत्तयस्तासां नि-
रोधः तासां लयाख्योधिकरणस्यैवावस्थाविशेषः। अभावस्यास्मन्मतेधिकरणावस्थाविशेषरूप-
त्वात् योग इत्यर्थः। ननु इदं लक्षणं संप्रज्ञातस्याव्यापकं। तत्र ध्येयाकारवृत्तिसत्त्वात् इत्याशंक्य भा-
ष्यकार आह। सर्व शब्देति। सर्ववृत्तिनिरोध इत्यवचनादित्यर्थः ननु एवं पूर्वोक्तातिव्याप्तिः क्षिप्तादिष्व-
पि यत्किंचिद्वृत्तिनिरोधादिति चेन्न। तदा द्रष्टुः स्वरूपेऽवस्थानमिति वक्ष्यमाणसूत्रसाहित्ये-
नैवास्य लक्षणत्वात् तथा च द्रष्टृस्वरूपावस्थितिहेतुश्चित्तवृत्तिनिरोधः क्षिप्ताद्यवस्थासु नास्ती-
ति नातिव्याप्तिः संप्रज्ञातस्य च स्वरूपावस्थितिहेतुत्वं असंप्रज्ञातद्वारास्त्येवेति। परे तु। क्षिणोति
ति चित्तक्लेशानिति एवं भाष्यानुसारेण क्लेशकर्मादिपरिपंथित्वं निरोधविशेषविशेषणतांहरणीयं एम०
तथा च क्लेशकर्मादिपरिपंथित्वे सति चित्तवृत्तिनिरोधत्वं योगद्वयसाधारणं लक्षणमित्याहुः। ॥६॥

6

अस्य चललक्षणस्य क्षिप्तादिभूमित्रयेतिव्याप्तिर्नास्तीत्यत्र हेतुं क्रमेण प्रतिपादयति चित्तं हीत्या
दिना। प्रख्यातत्त्वज्ञानं अनेन सर्वे सात्विकाः गुणा उपलक्षिताः। प्रवृत्तिः कर्म अनेन सर्वे राजसा
गुणा ग्राह्याः। स्थितिर्हेत्याख्य गतिशून्यता निद्रेति यावत्। अनेन सर्वे तामसा गुणा ग्राह्याः। एते
क्रमात्सत्त्वरजस्तमआख्यानां द्रव्याणां धर्माः पराश्रितत्वात् रूपादिवद्गुणा इत्युच्यन्ते। तदाश्रया
स्तु सत्त्वादिद्रव्याणि रज्वारंभकतंतुवदेव गुणा इत्युच्यन्ते। तथा च प्रख्यादिस्वभावकत्वात् चित्तं त्रि
गुणं सत्त्वादिगुणत्रयनिर्मितं रज्जुवदित्यर्थः। ततः किमित्यत आह। प्रख्यारूपं हीति। हि शब्दो वा
क्यालंकारे। अवधारणे वा। चित्तसत्त्वमिति चित्तस्य सत्त्वप्राधान्यप्रतिपादनाय पुनरुक्तं। प्र
ख्यारूपमिति च तेजःसत्त्वव्यावर्त्तनायोक्तं। तथा च प्रख्यास्वभावं चित्तरूपं सत्त्वं स्वोपसर्जन
भूताभ्यां रजस्तमोभ्यां संसर्गेणाणिमाद्यैश्वर्ये शब्दादिविषये चानुरक्तं भव

पा० ज० तीत्यर्थः। अतः क्षिप्तावस्थस्य वृत्तिनिरोधस्य स्वरूपावस्थानाहेतुत्वाद्योगाख्यक्लेशापरिपंथि
॥७॥ त्वाद्यानतत्रातिव्याप्तिरितिभावः। क्षिप्तावस्थायामतिव्याप्तिंपरिहृत्यमूढावस्थायामपितांपरि
हरति। तदेवतमसेति उपगमुन्मुखतप्रियमित्यर्थः। भावस्तुपूर्ववत्। विक्षिप्तावस्थायामतिव्या
7 प्तिंपरिहरति। तदेवप्रक्षीणेति। मोहस्तमोद्रव्यंकार्यकारणभेदात्। तदेवचदर्पणस्यमलवच्चित्त
सत्वस्यावरणंप्रक्षीणंयत्रतत्प्रक्षीणमोहावरणंसर्वतःप्रद्योतमानंसर्वविषयाकारवृत्तिमत्एवं
भूतंहिरण्यगर्भादीनांचित्तंरजोलेशेनसंभेदाद्धिक्षिप्तंसत्धर्मादिचतुष्टयप्रियंभवतीत्यर्थः। अ
त्रापिभावःपूर्ववदेववोध्यः। अवस्थात्रये॰तिव्याप्तिंपरिहृत्यएकाग्रनिरुद्धावस्थयोर्लक्ष्ययोर्ल
क्षणंक्रमेणायोजयति। तदेवरजोलेशेत्यादिना। विक्षेपहेतुनारजोलेशेनापिमलेनापेतंअत एम०
एवस्वरूपप्रतिष्ठंस्वाभाविकेनरूपेणप्रसादादिनासम्यगवस्थितंनिर्मलदर्पणवत्अतसत्व ॥७॥

पुरुषयोर्बुद्ध्यात्मनोर्विवेकख्यातिमात्रं तन्मात्रवृत्तिकं सत् धर्ममेघध्यानमात्रप्रियं भवति न तु क्ले
शादैश्वर्यादिप्रियमित्यर्थः। धर्ममेघध्यानं किमित्याकांक्षायामाह। तत्परमिति। तद्धर्ममेघाख्यं ध्या
नं परमं प्रसंख्यानं तत्त्वज्ञानं विवेकख्यातेरेव पराकाष्ठेति योगिनो वदन्तीत्यर्थः। तथा चेयमेकाग्रता
सत्त्वपुरुषान्यताख्यातिरूपिणी इष्टस्वरूपावस्थाने हेतुः। क्लेशकर्मादिपरिपंथिनी चेति। योगलक्ष
णाक्रान्तेति भावः। धर्ममेघः समाधिश्च सत्त्वकारेणैव व्यवस्यते यद्यप्यस्मितानुगत एवं संप्रज्ञातयो
गे सत्त्वपुरुषान्यताख्यातिरस्ति न वितर्कैः तर्कानुगतादौ तथाप्यनेनैवैतेप्युपलक्षणीया एतदंगभूत
त्वात्तेषामिति निरुद्धावस्थायामपि लक्षणं योजयन्नेव सकारणस्य निरोधस्य स्वरूपमाह। चिति
शक्तिरित्यादिना। संप्रज्ञातकाले संसारहेतुत्वादिदोषदर्शनादेवेतरवृत्तिनिरोधो जातः तस्माच्च
सिद्धायां विवेकख्यातिनिष्ठायां विवेकख्यातेरप्यनात्मत्वसाक्षात्कारणात् तत्फलसिद्धेश्च तत्रा

पिवैराग्यंभवतिकुतः सर्ववृत्तिनिरोधइतिप्रक्रिया।तत्रयादृशीविवेकख्यातिनिष्ठाविवेकख्याति
वैराग्येरूतुस्तामादर्शयतिरितीत्यंतेन।चितिशक्तिः पुरुषाख्यानपरिणामिनी।एवंधर्मायायेधर्मो
तरोत्पत्तिः परिणामस्तद्रहिता।कूटस्थनित्यापरमार्थसत्येतियावत्।लोकेर्थप्रकाशनरूपेफलएव
चैतन्यशब्दः प्रयुज्यतेचैतन्यफलोपधानंचनसर्वदासर्वपुरुषेऽस्ती।त्याशयेनशक्तिपदोपादानं।त
थाचशक्तिरूपेणावस्थिताचितिरित्यर्थः।चितिश्चनगुणः किंतुप्रकाशस्वरूपंद्रव्यमितिद्रष्टादृशिमा
त्रइतिसूत्रविस्तरतः प्रतिपादयिष्यामः।यतोपरिणामिनी।अतएवचितिशक्तिरप्रतिसंक्रमाअसंचा
रायथाबुद्धिर्विषयंगच्छतितद्वदणार्थनैवंचितिरक्रियत्वात्।अथवानास्तिप्रतिसंक्रमः संगोविषये
षयस्याइत्यप्रतिसंक्रमानिर्लेपेतियावत्।नत्वपरिणामित्वेचात्मनोविषयाकारताभावात्कथं
विषयस्फुरणंतत्राहदर्शितविषयाद्दर्शितोबध्यानिवेदितोविषयोयस्येइतिविग्रहः।विषयेःस

8

रुवद्धिवृत्तिस्थितौप्रतिबिंबितासतीभासतइतिभावः।वृत्तिसारूप्यमितरत्रेतिसत्त्वेचेतद्युक्तंभविष्य
तियतोपरिणामिनी।अतएवशुद्धावानंतावसुखदुःखमोहात्मिकाशुद्धिरहितापरिणाचउक्ताशुद्धेः
परिणामरूपत्वातसत्त्वस्यचपरिछिन्नत्वाद्वेति।इयंविवेकख्यातिः धर्मधर्म्यभेदात्तद्वृत्तीवृत्तिःऽसत्त्व
गुणात्मिकासत्त्वगुणस्यकार्या अतश्चितिशक्तितोविपरीतापरिणामिनीस्वयमेवविवेकाकारधारिणी
प्रतिसंक्रमवतीचदीपशिखावत्विषयेषुसर्पणात्तथाजडातथासुखदुःखाद्यशुद्धिमतीपरिच्छिन्ना
चइत्यतोऽनात्मत्वादिदोषदर्शनात्तत्फलसिद्धेश्चविवेकख्यात्यांविरक्तंप्रत्युत्पन्नालंप्रत्ययंचित्तंता
मपिख्यातिंनिरुणद्धि।आवृणोतिविलापयतीतियावत्परवैराग्येनहेतुनाचित्तस्यसाहिवृत्तिःस्वयमेववि
लीयतेयथानिद्रादोषेणसुषुप्तौजाग्रदादिवृत्तिरिति।शर्करास्वादेनैवगुडदोषाअभिव्यज्यंतइत्य
तोविवेकख्यातेर्दोषदर्शनेनपुरुषगुणदर्शनमुपपद्यतइतिभावः।तपायावद्वृत्तिदोषालिप्सत्वेन

पा०ज० वृत्तिवैधर्म्येण वृत्तिभेदात आत्मा न दृश्यते तावद्दोषदर्शनेपि आत्मत्वमात्रवृत्तिवैराग्यं न घटत
॥९॥ आत्मत्वेनैव परमप्रियत्वात् आत्मष्टस्नेहभयोरेव गुणदोषाभ्यां विविच्य दर्शने वृत्तिवैराग्ये हेतुरि
त्यप्याशय। तदवस्यं चित्तं संस्कारोपगं संस्कारमात्रानुसारि संस्कारमात्ररूपेणात्र शांतवाहि भव
9 ति। सेयं प्रशांतवाहिता स एवोक्तो निर्वीजः समाधिः। निरोधयोगो न किंचित्तयोगे जायत इति
विविग्रहेणासंप्रज्ञातनामा चेतिवाक्यार्थः। असंप्रज्ञातयोगे चित्तबीजस्य संस्कारस्य तत्त्वज्ञान
जन्यपर्यंतस्याशेषतो दाहान्निर्वीजसंज्ञातस्येति भावः वीजदाहादेव चास्य निरोधस्य स्वरूपा
वस्थितिहेतुतया क्लेशकर्मादिपरिपंथितया वलक्षणसंगतिरित्यप्याशयः। सुषुप्तेव निद्राख्य
चित्तवृत्तिसत्त्वान्नासंप्रज्ञातलक्षणातिव्याप्तिस्तत्कालीननिरोधस्य क्लेशादिपरिपंथित्वाभा एम०
वाच्चैतेन यदाधुनिकवेदांतिब्रुवा असंप्रज्ञातेपि निर्विकल्पमात्मज्ञानं स्वरूपसद्बुद्धिवृत्तिरू ॥९॥

पंतिष्ठतीतिवदंतितदप्रामाणिकत्वेनैतद्भाष्यविरोधेनचोपेक्षणीयं।मुंजीतयोगीनिर्जित्यत्रीन्
गुणान्परमात्मनि।तन्मयश्चात्मनाभक्त्वाचिद्वृत्तिमपिसंत्यजेदितिमार्कंडेयपुराणादावेश्वरयो
गोपिवृत्तिशून्यत्वावगमाच्च।निर्विकल्पकंत्वात्मज्ञानंसंप्रज्ञातकालएवभवतिशब्दार्थज्ञानविक
ल्पशून्यस्यसंप्रज्ञातकालीनज्ञानस्यैवनिर्विकल्पकत्वस्यलक्ष्यमाणत्वात्।योगद्वयमुपसंहरति।
द्विविधइति।ननुचित्तवृत्तिनिरोधकः पुरुषार्थइत्याकांक्षयंयोगलक्षणप्रणायवप्रवर्त्तमानंयो
गस्यफलप्रतिपादकंसूत्रमधिकप्रश्नमुखेनोत्थापयतिप्रसंगादात्मनः कौटस्थ्यमपिप्रतिपा
दयितुंतदवस्थइतिननुअसंप्रज्ञातावस्थेचा।तस्मिन्नितिबुद्धिबोधात्माबुद्धिविषयकबोधात्म
रूपोबुद्धिमात्रोपरूपः किंस्वभावः केनरूपेणतिष्ठतिकिंव्युत्थानइवतदातिष्ठतिव्युत्थानकाले
नुनिमित्तविशेषात्प्रकाशरूपेणपरिणमेत।किंवादग्धांत्तयेदीपवन्नश्यतीत्यर्थः।एतेषाघ

पा०ज० यत्तं सूत्रेण सिद्धांतयति तदा द्रष्टुः स्वरूपेवस्थानं तदा असंप्रज्ञातयोगकाले द्रष्टुः चितिशक्तेः पुरुष
॥१०॥ स्य स्वरूपे निर्विषयचैतन्यमात्रेऽवस्थानमित्यर्थः। यथा जपापाये स्फटिकस्य अलोहिते स्वस्वरूपेऽ
वस्थानं तथा वृत्त्यपाये पुरुषस्य वृत्तिप्रतिबिंबशून्ये स्वस्वरूपेऽवस्थानमिति भावः। यथा च तदा संस्का
रशेषवद्धर्मौनं न भवति तथोत्तरसूत्रे वक्ष्यामः। तथा च कूटस्थ एव पुरुषो व्युत्थान इव तदानीमपि प्र
10 काशस्वरूप एव तिष्ठति योगलक्षणमप्येतद्धेतुनिरोधत्वमेव तत्र च वृत्त्यात्मकदुःखाभावः पुरुषार्थ
इति भावः। सोयं पुरुषार्थो भाष्यकारेण सूचितो यथा कैवल्यमित्यनेन कैवल्ये द्विदुःखनिवृत्तिरेव पुरु
षार्थ इति वक्ष्यति। हेयं दुःखमनागतमिति सूत्रेणेति। क्रमेणावरमासंप्रज्ञाते अशेषसंस्कारस्य यात
वित्तेन सर्ववृत्तीनामात्यंतिकनिरोधे मस्यात्यंतिकं स्वरूपावस्थानं मोक्षाख्यमिति। ननु तदानीं दुःखा एम०
भावेअन्यदा दुःखमस्तीत्यायातं। तथा चापरिणामित्वानुपपत्तिरित्याशंकां परिहरति भाष्यकारो ॥१०॥

व्युत्थानेतोव्युत्थानचित्तदशायांतुचितिस्तथापिस्वरूपेणापितिष्ठतीनतथानासंप्रज्ञातस्यकेवल्यस्य
चसमानरूपेत्यर्थः सूत्रांतरमवतारयितुंपृच्छतिकथंतर्हीति। कूटस्थापिचितिः केनप्रकारेणतर्हिव्यु
त्थानेतिष्ठतीत्यर्थः। असंप्रज्ञातापेक्षयासंप्रज्ञातोप्यत्रव्युत्थानंबोध्यं। अत्रप्रत्युत्तरंसूत्रेतुपदम
ध्याहृत्यपठतिदर्शितविषयत्वादिति।। वृत्तिसारूप्यमितरत्र इतरत्रव्युत्थानेचित्तेनसहदृष्टुर्वृत्तौ
सारूप्यमित्यर्थः। व्युत्थानेहिविंबप्रतिबिंबरूपयोर्बुद्धिपुरुषवृत्त्योः सारूप्यं। तदेतद्व्याचष्टेव्युत्थाने
ति इतरत्रव्युत्थानेयाचित्तस्यवृत्तयोदीपस्यशिखाइवद्रव्यरूपाः भंगुराश्चावस्थापरिणामास्ताश्चानि
षिक्तद्रुतताम्रवत्स्वसंयुक्तार्थाकारास्त्रिगुणकार्यत्वात्सुखदुःखमोहाश्रयतयाशांतघोरमूढाख्या
भवंति। ताभिरविशिष्टा अविलक्षणावृत्तयोयस्यपुरुषस्यसतथा। वृत्तिश्चगुणोनभवतिभागगुणा
भ्यांतत्त्वांतरंवृत्तिः संबंधार्थंसर्पतीतीतिसांख्यसूत्रात्। भागोविभक्तांशोग्निविस्फुलिंगवतिकुतः

पा॰ ज॰ ॥११॥ पुनरपरिणामिनोवृत्तिस्तत्रोक्तं दर्शितविषयत्वादिति। बुध्यानिवेदितविषयत्वादित्यर्थः। निवेदनं च
स्वारूढविषयस्य प्रतिबिंबरूपेण चित्साधानं। गृहीतानिंद्रियैरर्थानात्मने यः प्रपछति। अंतःकरणरू
पाय तस्मै विश्वात्मने नम इति विष्णुपुराणादिभ्यः एतदुक्तं भवति यद्यपि पुरुषश्चिन्मात्रो विकारी तथा
पि बुद्धेर्विषयाकारवृत्तीनां पुरुषे यानि प्रतिबिंबानि तान्येव पुरुषस्य वृत्तयः। न च ताभिरवस्तुभूता
भिः परिणामित्वं स्फटिकस्येव तात्त्वतोऽन्यथाभावादिति। तदुक्तं सांख्ये जपास्फटिकयोरिव नोपरागः
किंत्वभिमान इति सूत्रकारोपि वक्ष्यति। चितेरप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदनमिति।
एतेन सुखदुखमोहगुणकवृत्तिसारूप्यात् व्युत्थाने चितिरपि दुखादिमवतीव यद्भवति तदेव चितेर्दु
खभोगो दुखाभ्यवहरेण रूपदुखहानमेव चासंप्रज्ञातस्य फलमिति सूत्रद्वयेन सिद्धं। ये तु अहं सु
खी दुखीत्यादिप्रत्यया आत्मन एव पारमार्थिकी वृत्तिमिछंति त एवं प्रत्याख्येयाः। स्वतएव चेदात्मनः राम॰ ॥११॥

परिणामस्तर्हि सर्वावच्छेदेन सर्वदा वृत्तिप्रसंगात् अनिर्मोक्षादिप्रसंगः। परिच मनःसंयोगो निमित्तं त
र्हि लाघवादेकेन मनस्त्वेनैव हेतुतास्तु आत्मनस्तत्संयोगानां त्रयाणां हेतुत्वे गौरवात् अनुमानं च अ
र्थाकारपरिणामसुखादिकं अंतःकरणोपादानकं बाधकाभावे सति तदचेपव्यतिरेकानुविधायित्वात्
मनःसंयोगवदिति भोगे व्यभिचारणापसत्यंतं बुद्धेः स्वभोक्तृत्वे च बाधकं कर्मकर्तृविरोधं सूत्रकारो व
स्यति अहं कर्त्ता सुखीत्यादिप्रत्ययास्तु अहं गौर इत्यादिभ्रमशतांतःपातित्वेनाऽप्रामाण्यशंकास्कं
दितो नानुमानस्य बाधकः प्रस्तुत प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः। यः पश्यति तथात्मा
नं अकर्त्तारं स पश्यतीत्यादिस्मृत्युपोद्बलितेनोक्तानुमानेनैव ते बाध्यंते। देहभिन्नात्मसाधकेऽनु
माने अहं गौर इत्यादिप्रत्ययवदिति दिक्। स्वोक्ते बुद्धिपुरुषयोर्वृत्तिसारूप्ये पंचशिखाचार्यसूत्र
प्रमाणयति। तथा च सूत्रमिति बुद्धेर्दर्शनं पुरुषस्य। इत्यंतं च सूत्रं तथा च ख्यातिरेवदर्शनमि

त्येकमेव एकाकारमेव दर्शनं भ्रमो लोकानामिति सूत्रार्थः। इति शब्दश्चान्यो भाष्ययोजनार्थं एरणीयः।
12 न तु स्वविषयवृत्तेः। स्फुरणं चेतनसंयोगादेव भवतु यथा सजलघटादिप्रकाशः सूर्यसंबंधात् अतः
किमर्थं चैतन्ये वृत्तिप्रतिबिंबं वृत्तौ च चैतन्यप्रतिबिंबं कल्प्यते। सुख्यहं जानामीति बुद्धिपुरुषयोरे
कतात्मभ्रमस्तु परस्परप्रतिबिंबं विनापि स्त्हरस्य वनस्पत्योरिव दोषवशादेव संभवतीति तत्कथं बुद्धि
पुरुषयोर्वृत्तिसारूप्यसिद्धिरिति। अत्रोच्यते। चेतने तावद्वृत्तिप्रतिबिंबमवश्यं स्वीकार्यं अन्य
थाकूटस्थनित्यविभुचैतन्यस्य सर्वसंबंधात् सदैव सर्ववस्तु सर्वैर्ज्ञायेत न हि सूर्यसंबंधे सति घ
टाद्यप्रकाशो दृष्ट इति। न चाज्ञानाख्यं ज्ञानप्रतिबंधकं चैतन्ये कल्पनीयं। नित्यज्ञानस्य प्रतिबंधा
संभवात्। दुःखाज्ञानमया धर्माः प्रकृतेस्ते तु नात्मन इत्यादिभिरात्मन्यज्ञानप्रतिषेधाच्च अतो रम०
र्थभानस्य कादाचित्कत्वाद्युपपत्तये अर्थाकारतैवार्थग्रहणं वाच्यं बुद्धौ तथा दृष्टत्वात्। बुद्धा ॥१२॥

वपि दृक्संयोगमात्रस्यार्थग्रहणत्वे अतींद्रियार्थस्यापि बुद्धिग्राह्यत्वप्रसंगात्॥ साचार्थाकारता बुद्धौ
परिणामरूपास्त्वप्रारोपो विषयाभावेन तत्प्रतिविंबासंभवात् पुरुषे च प्रतिविंबरूपा विद्यमानवृत्ति
मा याद्रुके पुंसि प्रतिविंवेनैवोपपत्तेरिति। न केवलं तर्कादेव चितिबुद्धेः प्रतिबिंबं कल्प्यते। किंतु।
तस्मिंश्चिद्दर्पणे स्फारे समस्ता वस्तुदृष्टयः॥ इमास्ताः प्रतिबिंबंति सरसीव तटद्रुमाः। यथा संलक्ष्यते
रक्तः केवलः स्फटिको जनैः। रंजकाद्युपधानेन तद्वत्परमपूरुष इत्यादिस्मृतिशतैरपीति। न चैवं संस्का
रशेषा बुद्धिः पुरुषे प्रतिबिंबिता यदि स्यात् संप्रज्ञातयोगाद्यनुपपत्तिरिति वाच्यं परमाणोरिक्तानां प्रति
बिंबसमर्पणसामर्थ्यस्य फलबलेन कल्पनात्। अनादिस्वस्वामिभावस्यैव प्रतिबिंबनियाम
कतया वक्ष्यमाणत्वाच्च न परबुद्धिदृष्टत्वं मर्मानं॥ अत एव पुरुषार्थवत्येव बुद्धिः पुरुषस्य विषय
इति सांख्याति विषयभोगो च पुरुषार्थाविति। यथा च चितिबुद्धेः प्रतिबिंबं एवं बुद्धावपि चित्प्र

पा०अ० तिबिंबं स्वीकार्यं अन्यथा चैतन्यस्य भानानुपपत्तेः। स्वयं सोऽस्मि स्वदर्शने कर्मकर्तृविरोधेन बुद्ध्यारू
॥१३॥ पतयैवात्मनो घटादिवत् ज्ञेयत्वाभ्युपगमात्। तथा च वक्ष्यति सूत्रकारो द्रष्टृदृश्योपरक्तं चित्तं सर्वा
13 र्थमिति। बुद्धौ चात्मप्रतिबिंबमेव चेतनां चिकाबुद्धेश्छायापत्तिरित्यात्माकारतेति चोच्यते। प्रतिबिंब
बोपाधौ बिंबाकारो बुद्धेः परिणाम एव स साक्षिमा इति एतेन नीरूपत्वात् बुद्धिपुरुषयोरन्योन्यं प्रति
बिंबनं न संभवतीत्यपास्तं। उभयत्रोभयाकारबुद्धिपरिणामस्यैव प्रतिबिंबशब्देनात्र विवक्षित
त्वात् जलादावपि सूर्याद्याकारबुद्धिपरिणामस्यैव प्रतिबिंबशब्देनात्र विवक्षितत्वात् जलाद्यौ
सूर्यादिप्रतिबिंबत्वाभ्युपगमादेव बुध्यात्मनोः परस्परप्रतिबिंबरूपाद्दोषादेवैकताभ्रमोऽहं कर्ता सुखी राम०
जानामीत्यादिरूप इति तदेतत्परस्परप्रतिबिंबं सांख्यकारिकायामिव शब्दाभ्यामुक्तं तस्मात्तत्सं ॥१३॥
योगादचेतनं चेतनावदिव लिंगं गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीन इति दिक्। अयं चैतन्ये

बुद्धिवृत्तिसारूप्यमुक्तंचैतन्यस्यबुद्धिवृत्त्याकारतारूपंइदयंइदमेवचैतन्यस्यार्थोपरक्तवृत्तिभानं।
तस्यचाकारोयघटइत्यादिरूपएवअन्यथावृत्तिसारूप्यानुपपत्तेः।।ननुवृत्तिबोधस्यपृथगाका
रोस्ति।घटमाहंजानामिदुःखितोहमित्यादिकंतुबुद्धेर्वाकारांतरं।पुरुषस्यापरिणामित्वात्अभ्रां
तत्वाच्चेति।तथाचसूत्रकारोवक्ष्यति।चितेरप्रतिसंक्रमायास्तदाकारापत्तौस्वबुद्धिसंवेदनमिति
।ननुवृत्तितद्बोधोपदिपटदीपाविवात्यंतभिन्नौनतुचिज्जडात्मकमचिज्जडात्मकमविभक्तमेकंव
त्कमणिकांतिवत्तर्हितत्तच्चित्तवृत्तीनांप्रतिनियतत्तत्पुरुषमात्रबोध्यत्वेकिंनियामकमित्याकां
क्षायांप्रतिनियतयोरेवचित्तात्मनोरनादिःस्वस्वामिभावसंबंधस्तन्नियामकइतिप्रतिपादयति।
चित्तमयस्कांतेत्यादिनासंबंधोहेतुरित्यंतेतुरित्यंतेन।तत्राप्यादावनादिंस्वस्वामिभावंयुक्त्योपपा
दयति।चित्तमितियथाऽयस्कांतमणिःस्वस्मिन्नेवायःसन्निधीकरणमात्रात्शल्यनिष्कर्षणं।

पा० ज० स्यमुपकारं कुर्वं स्वामिनः स्वं भवति भोगसाधनत्वात् तथैव वित्तमप्ययः। सद्दशविषयजातस्यस
॥१४॥ स्मिन्नं निधीकरणमात्राद्दृश्यत्वरूपमुपकारं कुर्वन्पुरुषस्वामिनः स्वं भवति भोगसाधनत्वेन। अत
श्चित्तपुरुषयोरनादिः स्वस्वामिभावः संबंध इति शेषः ततः किमित्यत आह। तस्मादिति। तस्मा
14 दिति। तस्मात्स्वस्वामिभावस्य सिद्धत्वात्स एवानादिसं। बंधा पुरुषस्य चित्तवृत्तिदर्शने हेतुरित्यर्थः।
अतो न परचित्ते न परस्य वृत्तिसारूप्यं भवति कदापि तद्संबोधेन तयोस्स्वस्वामिसंबधाभावात ननु
स्वस्वामिभामिभावस्य कथमनादित्वं स हि भोग्यभोक्तृभावरूपतया प्रलये न तवतीति मेवं। अन्यै
र्भुज्यमानधनेपि सुषुप्तस्य स्वस्वामिभावेन स्वत्वामित्वयोरतिरिक्तपदार्थत्वात्। स्वरूपसंबंध
विशेषत्वाद्वा। घतियोग्यनुयोगिभावत्वात्। अथवा स्वभुक्तवृत्तिवासनावत्त्वमेव बुद्धौ पुरुषस्य रम०
स्वत्वं ईदृशो भोग्यभोक्तृभावएव च तां त्रिकैर्भोग्यभोक्तृयोग्यतेत्युच्यते। चिरवसानो भोग इति ॥१४॥

सांख्यस्तन्त्रोक्तस्यसुखानुभवरूपभोगस्यपुरुषधर्मत्वादिति।सचतत्स्वामिभावश्चित्तपुरुषयो
रनादिरेवस्वीक्रियते।नचमहत्तत्त्वरूपस्यचित्तस्यकार्यतयाकथंतद्धर्मस्यानादित्वमितिवाच्यं।
अंतरणस्यद्व्यवस्थवद्द्वयवद्कार्योवमहत्तत्वपरितापास्वीकारात्।बीजावस्थातुमहत्तत्वस्यश्मस्तत्वरूपा
नित्यैवअन्यथाधर्माधर्मसंस्कारादीनामाश्रयंविनाप्रलयेवस्थानानुपपत्तेः प्रकृतिमात्रस्यत
दाश्रयत्वेतत्कार्यभोगस्यस्यादरपितन्निष्ठस्यचौचित्यात्अतः करणकल्पनानर्थक्यंअंतःकर
णाधर्मत्वंधर्मादीनामितिसांख्यस्तत्रस्ययथाश्रुतार्थानुपपत्तिश्चेति।अथैवंबुद्धितत्कारणयोरू
पोभधर्मादिकल्पनेगौरवमितिचेत्।दृष्टानुसारितयास्यगौरवस्यप्रामाणिकत्वात्।यथाहिपर
माणुपर्यंतमेवघटेपाकेनरूपंजायतेनतघटभंगेचतैरणुभिर्यदांतसंउपक्वंभवतितथैवप्र
कृतिपर्यंतमेवबुद्धोधर्मादिकमुत्पद्यते।तद्बुद्धिनाशेचतत्प्रकृतिमित्ताहंशधर्मादिमदेवबु

ध्यंतरं उत्पाद्यते कारणगुणक्रमादिति दिक्कृत्साद्दिलक्षणा अपि वृत्तयः संतीत्यागामिसूत्रस्य
न्यूनतां परिहर्तुं चित्तस्येत्यंतं परापि सोत्तरसूत्रमवतारयति। ताः पुनरिति। चित्तस्यवद्वृत्तिक
ल्पिता निरोद्धव्या वृत्तयो क्लिष्टाक्लिष्टरूपा वक्ष्यमाणाः पंचतय्य एवेति सूत्रेणाक्षरान्वयः प्रमा
णादिरूपवक्ष्यमाणवृत्तिपंचकनिरोधेनैव तत्कार्याणामन्यवृत्तीनां निरोधसिद्धिरिति भावः वृ
त्तयः पंचतय्यः क्लिष्टाक्लिष्टाः ये प्रमाणादिलक्षणव्यापारैश्चित्तं जीवतीति ते तद्वृत्तय उच्यन्ते द्विजा
दीनां याजनादिवत्। क्लिष्टास्त्वक्लिष्टाक्लिष्टाः। निरोद्धव्या वृत्तयः क्लिष्टा वा अक्लिष्टा वा भवंतु वक्ष्य
माणपंचतय्यः पंचप्रकारा एवेति सूत्रार्थः। वृत्तीनामसंख्यव्यक्तितयावयवार्थकत्वानुपपत्त्या
तयपो लक्षणयात्र प्रकारवाचित्वं। ताः पंचधा वृत्तय इत्यागामिभाष्यादिति। क्लिष्टवदक्लिष्ट
स्यापि हेयत्वप्रतिपादनाय क्लिष्टाक्लिष्टविभागप्रदर्शनं। तत्राचार्यक्रमः। अक्लिष्टा उपादा

दायक्लिष्टानिरोद्धव्याः। ततस्ता अपि परवैराग्ये पक्लिष्टविभागप्रदर्शनं। तत्रायं क्रमः। अक्लि
ष्टा उपादायक्लिष्टानिरोद्धव्याः। ततस्ता अपि परवैराग्येणेति। सत्वेनान्यतमादन्यात्सत्वं सत्वे
नैव वशीति तस्मरणात्। क्लिष्टाव्यावृष्ट क्लेशहेतुका इति त्रिगुणात्मकतया सर्वासामेव वृत्ती
नां क्लेशवत्वेन क्लिष्टाक्लिष्टविभागो नोपपद्यत इत्यतः क्लेशसंबंधविशेषपरतयेत्थं व्या
ख्यापतेऽत्र च हेतुः प्रयोजनं क्लेशात्रमुख्य एव व्याख्ये दुःखाख्यः तथा च क्लेशहेतुका दुःखफ
लिका विषयाकारवृत्तप इत्यर्थः। क्लेशजनकत्वे हेतुः कर्मेत्यादि कर्माशयप्रचयानं धर्माध
र्मावासनासमस्तानां क्षेत्रीभूता आलंबनीभूताः क्लिष्या इत्यर्थः। विषयाकारवृत्तिजन्यत्वस्माध
भिरुतत्तद्धानार्थं यतमानः परपीडानुग्रहाभ्यां धर्माधर्मावुपचिनोतीति तत्श्वदःखधाराभवंती
ति भावः। अक्लिष्टा व्याचष्टे ख्यातीति अक्लिष्टा अक्लेशफलिकाः तास्वगुणाधिकारविरोधिन्यः।

पा०ज० गुणानांसत्वादीनामधिकारःकार्यारंभणंतद्विरोधिन्योऽविद्याकाामकर्मादिरूपकारणानाशकत्वा

॥१६॥ त्।ख्यातिविषयाविवेकख्यातिविषयाविवेकख्यातिसंवद्धाइत्यर्थः।ख्यातिसाधनस्यापिसंग्रहायवि

षयइमिति।ननुरजस्तत्वकारेणतामसीनांसात्विकीनांचद्विविधानामेववृत्तीनांनिरोद्धव्यत्वमुक्तंनतु

सीनांक्लिष्टाक्लिष्टाक्लिष्टरूपमिश्रवृत्तीनामितिमन्दननेत्याशंक्यमिश्रवृत्तीनामुक्तास्वेवांतर्भाव

माह।क्लिष्टप्रवाहेतिछिद्रेषीभवताअपिअक्लिष्टरूपान्तराणायद्यपिक्लिष्टछिद्रेषुसंतितथाप्यक्लि

ष्टाएवअक्लिष्टशब्देनगृहीताएवभवंतिएवंअक्लिष्टछिद्रेष्वपिक्लिष्टाःक्लिष्टशब्देनगृहीताइत्य

र्थः।तथावणजस्याभिश्रवृत्तेरेणाभ्यांअंशिन्योःप्रवेशइतिनन्दनता।इदानींवृत्तिनिरोधस्यफ

लंकुमारोसंसारानर्थवीजंसंकारंदर्शयति।तथाजातीयकाइतिक्लिष्टजातीयकाःसंस्काराइत्य राम०

र्थः।अस्यजीवभ्रामकस्यवृत्तिसंस्कारचक्रस्यस्तंभनेप्रलयेचनिधरोएवोपायइत्याहातदेवंभ ॥१६॥

तमिति। तद्वृत्तिसंस्कारचक्रात्मकं चित्तमेवंभूतं निरोधावस्थमवसिताधिकारं क्रमेण समानाधिका
रं सदात्मकत्वेनात्माविभागेन निर्दुःखतयातिष्ठत्यानपर्यंतं। अथवाभ्यासपाटवेनाखिलसंस्कारक्ष
ये सति प्रलयमात्यंतिकं स्वयमेव गच्छति विदेहकैवल्यं प्राप्नोतीत्यर्थः। निरोधसमाधेः पुनरुत्थाने
मेव योगिनां मुक्तिरिति भावः। एवं सूत्रेण सह योजनार्थं ताः क्लिष्टाक्लिष्टाश्च पंचधा वृत्तय
इति दर्शयित्वानंतरसूत्रं पठति प्रमाणविपर्ययविकल्पनिद्रास्मृतयः॥ सुगमं सूत्रं। तत्रेति दर्शयि
त्वोत्तरं सूत्रमवतारयति तत्र तासु वृत्तिषु मध्ये। प्रत्यक्षानुमानागमाः प्रमाणानि॥ अनधिगततत्त्वबो
धः प्रमा तत्करणं प्रमाणमिति प्रमाणसामान्यलक्षणं सुगमत्वादकृत्वैव विभागः कृतः परोक्ता
नि चेतराणि प्रमाणान्येष्वेवांतर्भावं प्राप्नुवंतीत्याशय इति। प्रत्यक्षं व्याचष्टे इंद्रियेति। इंद्रियाण्येव ना
डी चित्तसंचरणमार्गास्तैः संयुज्य तद्गोलकद्वारा बाह्यवस्तुषूपरक्तस्य चित्तस्येंद्रियसाहित्येनै

पा० जा० ॥१७॥ 17

वार्थाकारःपरिणामोभवतिनकेवलस्यचित्तस्यशंखपैत्यायाकारतायांनयनादिगलःपित्ताद्यन्व
यव्यतिरेकाभ्यांअतोरूपादिवृत्तिषुचक्षुरादीनामपिकरणत्वंशास्त्रेएव्यते।अत्रोपरागादिसंते
नचास्यहेतोःकारणमात्रंप्रदर्शितं।नतुतल्लक्षणोप्रवेशनीयं।आत्मादिप्रत्यक्षाव्यापनातईश्वरप्र
त्यक्षाव्यापनाच्चतस्याजन्यत्वातअर्थस्येत्यनेनसमारोपितत्वनिषेधातनविपर्ययेतिव्याप्तिः।विशे
षावधानेतिविशेषणादनुमानागमयोर्व्यावृत्तिः।स्मृतिव्यावर्त्तनायेति।उपरक्तवस्तुविषयेत्य
र्थः।सामान्यविशेषाभ्यामत्यंतभिन्नएवार्थइत्येके।तन्निरासायोक्तंसामान्यविशेषात्मनइति।
अनेनचावयवीननिराकृतः।किंत्ववयविनिसामान्यविशेषयोरविभागलक्षणंतादात्म्यमुक्तं
।पश्चादवयविव्यवस्थापनादिति।अनंतारश्चयत्तस्यदीपवद्यःस्थितोस्यनंताश्चवुद्धयोव्यव रामं०
सायिनीनां।इत्यादिस्मृतिभ्योरोसम्यशास्वादितुल्याभातवृत्तिःप्रभावतरद्व्यमेवेतिप्रागेवो ॥१७॥

त्तं। सा हि वृत्तिरेव दीपप्रभावत् बाह्यार्थमुपसृत्य चक्षुराद्येकीभावेन घटाद्याकारा भवति। स्वप्नध्या
नादौ घटाद्याकारतया चित्तवृत्तेरनुभूयमानत्वाद्बाह्येऽपि ज्ञानाकारः सिध्यति अत्रांशे बौद्धाना
मस्माकं चैकवाक्यत्वेऽपि न सपिम्यग अस्माभिर्बाह्यार्थस्यापि स्वीकारादिति। प्रत्यक्षस्य लक्षणं
कृतं। इदानीं तस्य प्रमाकारणत्वेन प्रमाणत्वमुपपादयति। फलमिति वृत्तिरूपस्य करणस्य फल
पुरुषनिष्ठश्चित्तवृत्तिविषयको बोधः। पुरुषार्थमेव करणानां प्रवृत्तेः अयं च बोधो विषयदेश
एव भवति किम्भूतात्। ननु अयं घट इति वृत्तेर्बोधो घटमहं जानामीतिरूपस्तस्य च पौरुषेयत्वे पु
रुषस्य स्वतन्त्राकारेण परिणामित्वापत्तिरिति तत्राह। अविशिष्ट इति स च बोधश्चित्तवृत्त्या सहा
विशिष्ट इति वृत्तिसारूप्यसूत्रे प्रतिपादित इत्यर्थः। अयं घट इत्याकारो विम्बरूपा वृत्तिः करणं
तस्या एव वृत्तेश्चैतन्ये प्रतिबिम्बनाच्चैतन्यमप्ययं घट इत्याकारमिव सन्बोधाख्यं फलं भवती

पा० ज० ॥१८॥ तिनात्र विशेषः शब्देन वक्तुं शक्यते। विवेकिरेव स्त्र्यादिरामाधुर्यस्येव स्वयं विशेषोनुभूयते। इत्य
श्यादिवेधर्म्यादिति भावः। पौरुषेयोबोध इत्याधाराधेयभावस्थ गगनेश्रोत्रमितिवद्वि
स्मा विशिष्टभेदेनोपपादनीयः कारणलक्षणांचात्र फलायोगव्यवछिन्नकारणतामिति ननुरू
पादिषु वस्तुरादीनामेवकारणत्वं ननु पौरुषेयबोधरूपांमुख्यप्रमांप्रति। प्रमाद्वयं चसांख्येमर
त्रितं द्वयोरेकतरस्य वासंनिकृष्टार्थपरिछित्तिः प्रमेति चक्षुरादीनांचवृत्तौकरणत्वंव्यापारवन्का
रणत्वरूपंकुठारादावितिशेषः ननु विषयाकारतेव विषयग्रहणं चिचक्षुरादीनांचवृत्तौकर
णत्वंव्यापारवदकारणत्वरूपंकुठारादाविवेतिविशेषः। ननु विषयाकारतेव विषयग्रचित्तस्य
लेदृष्टंपुरुषस्तुकूटस्थोन वृत्त्याकारतांभजतेअतः कथं पुरुषश्चित्तवृत्तिसाक्षीस्यात् कथं वा० एम० ॥१८॥
विशिष्टः पौरुषेयोबोध इत्याशंकायामाह। प्रतिसंवेदीति। संवेदिन्या वुद्धेः प्रतिसंवेदीत्त्रसमा

18

नाकारः पुरुषइत्येतद्वस्तुर्थापादं चितेः प्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदनमिति सूत्रे
उपपादयिष्यामइत्यर्थः। यद्यपि किंच चितेः स्वयमाकारो नास्ति तथापि प्रतिबिंबवशाद्बुद्ध्याकारा
पत्त्याद्वृत्तिबोधइत्यस्माभिर्वृत्तिसारूप्यप्रसंगेन प्रागेवव्याख्यातं। कश्चित्तु बुद्ध्याख्यकरणसा
मानाधिकरण्येन बुद्धावेव प्रमाणाख्यं फलं जायते। चैतन्यमेव हि बुद्धिदर्पणप्रतिबिंबितं बुद्धिवृत्त्या
र्थाकारया तदाकारतामापद्यमानं फलं। तच्च चितच्छायाख्यं चित्प्रतिबिंबं बुद्धेरेव धर्मइति वदति।
तन्नापौरुषेयशब्दस्य यथाश्रुतार्थत्यागापत्तेः। प्रतिबिंबस्य तुच्छतयाऽर्थमानरूपत्वानुपपत्ते
श्च। प्रतिबिंबस्य प्रकाशाद्यर्थक्रियाकारितायाः क्वाप्यदर्शनाच्च। प्रतिबिंबं हि तत्तदुपाधिषु बुद्धे
विंकाकारपरिणाममात्रमिति। किंच परस्परं प्रतिबिंबस्य श्रुतिस्मृतिसिद्धतया चितेरेव वृत्तिप्र
तिबिंबितोपहितायाः फलत्वं युक्तं ज्ञानशब्देनात्मन एव प्रतिपादनात्। सत्यं ज्ञानमनंतं ब्रह्म

पा० ज० ज्ञानं बंधाय चेष्यते। इत्यादिश्रुतिस्मृतिषितिबुद्धिस्थच्छायायत्तिश्चाहमित्यादिरूपेष्वितो भाना
॥१९॥ र्थमेवेष्यते। बुध्यारोहं विना साक्षभाने कर्मकर्तृविरोधादित्युक्तमेव॥ अपि च बुद्धेरेव प्रमा
तृत्वे पुरुषो न सिद्ध्येत। वृत्तिसाक्षितया पुरुषसिद्धिरिति चेत॥ एवं सति वृत्तिद्रष्टृत्ववृत्त्यारूढ
19 त्वकल्पनोचितात्तु न बिंबप्रतिबिंबयोरुभयोरेव द्रष्टृत्वं अर्थभेदेन कल्पयितुं युक्तं गौरवादिति।
किं च जानामीत्येवं बुद्धिवृत्त्यवभाससमानं प्रतिबिंबे तैतन्यं स्वज्ञेयं न संभवति कर्मकर्तृविरोधात् अ
तो बिंबचैतन्ये भानमावश्यकमिति। अत्रापं प्रमात्रादिविभाग॥ प्रमाता चेतनः शुद्धः प्रमाणं
वृत्तिरेव च। प्रमार्थाकारवृत्तीनां चेतने प्रतिबिंबनं। प्रतिबिंबितवृत्तीनां विषयो मेय उच्यते। वृत्ती
यः साक्षिभास्याः स्युः करणस्यानपेक्षणात। सा साहं दर्शनरूपं वसाक्षित्वं सांख्यसूत्रितं। अविका एम०
रेण द्रष्टृत्वं साक्षित्वं चापरे जगुरिति दिक्। पुरुषे वृत्तिबोधरूपं च फलं अनुमानादिसकलवृत्ति ॥१९॥

षपिबोध्यं। अनुमानेनलक्षयति। अनुमेयस्येति। अनुमेयस्येति। तैस्साध्यविशिष्टः पक्षोनुमेयः
तस्यसाध्यत्वेएवंभूतापासामान्यावधारणप्रधानावृत्तिः सानुमानमित्यर्थमित्यर्थः संबंधत
त्सजातीयेषुसपक्षेषुअनुवृत्तोविजातीयेभ्योविपक्षेभ्योव्यावृत्तश्चयः संबद्धोर्थात्तत्रैवानु
मेयेपक्षवृत्तिरितियावततद्विषयात्तन्निबंधनात्सिद्धःवंधनइत्यनुशासनात्तद्विषयज्ञानज
न्येतिपावतएवंभूतायासामान्यावधारणप्रधानावृत्तिः सानुमानमित्यर्थः। संवंधइतिपाठ
तिपा। अनुमानवृत्तैरुदाहरणमाहयथादेशांतरप्राप्तेरिति। अत्रान्वयव्याप्तौदृष्टांतश्चै
त्रवदिति। व्यतिरेकव्याप्तौवदृष्टांतोविंध्यश्चामाप्तिरगतिरिति। प्राप्तेरितिपंचमीपाठस्तुलेखकप्र
मादात्प्रत्यक्षमितिहेतुमितिवैयर्थ्यादिति। आगमाख्यांवृत्तिंलक्षयति। आप्तेनेति। भ्रमप्रमादवि
प्रलिप्साकरणापाटवादिदोषरहितेनेत्यर्थः। मलवक्रभिप्रायेणअतोवेतिनोक्तंतद्रूपल

पाज० क्षणीयं। स्वबोधसंक्रान्तये स्वबोधसदृशबोधोत्पत्त्यर्थं श्रोतुर्वृत्तिरिति श्रुतक्रमेणान्वयः। अत्राप्तो
॥२०॥ क्तार्थविषयिणी शब्दजन्या वृत्तिरागम इत्याशयः। तदर्थविशेषणव्यावृत्त्या अप्रमाणागमनिवृ
त्तिं दर्शयति। यस्येति। दृष्टानुमितार्थकत्वाभावेनाश्रद्धेयार्थेश्रद्धेयप्रतिपाद्यको यस्यागमस्य वक्ता
स आगमः शास्त्रं चैत्यं वन्देत स्वर्गकाम इत्यादिरूपं प्लवते प्रमाणवृत्तिजननासमर्थ इत्यर्थः। न त्वेवं
20 दृष्टानुमितार्थकवक्तृनिर्मितस्य श्रुतिमूलस्याधुनिकागमस्यापि प्लवः स्यात् इत्याशंक्याह मूलवक्त
रीति। प्रमाणं लक्षयित्वा विपर्ययं लक्षयति। विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठं विपर्यय इति ल
क्ष्यनिर्देशः मिथ्याज्ञानमिति लक्षणं मिथ्येत्यस्य विवरणमतद्रूपप्रति। न तद्रूपो न स्वसमानाका
रो यो विषयस्तत्प्रतिष्ठं तद्विशेष्यकमित्यर्थः। भ्रमस्थले ज्ञानाकारस्यैव विषये समारोप इति भावः। एम०
संशयस्याप्यत्रैवान्तर्भावः॥ अत एव शास्त्रेऽन्यथाख्यातिः सिद्धान्तो न तु सांख्यवदविवेकमात्रं भ्र ॥२०॥

नित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्येत्यागामिसूत्रात् । वैशेषिकाद्वात्रायं वि
शेषो यद्वा स्थिरजतादेर्नारोपः किंत्वांतरस्यैवेति । ज्ञानाकारमनुभवतीदं शुक्त्यादिसंनिकृष्टं विद्या
यद्दूरस्थरजतादिविषयकत्वकल्पने गौरवात् । स्वप्रदृष्टमिदानीं नास्तीति स्वरूपतो बाधानुपपत्ते
श्च । तथा च ब्रह्मसूत्रद्वयं । संध्ये सृष्टिराह हीति । तदभिध्यानादेव तत्तिरोहितं ततो ह्यस्य बंधविपर्य
याविति चेति । ननु प्रतीतिबलेनैव विषयः सिध्यतु तथा च शुक्तिरजतादिस्थलेप्यतद्रूपप्रतिष्ठ
त्वमसिद्धमित्याशयेन पृच्छति । तत्कस्मादिति । परिहरति । एत इति । अबाधितानुभवेनैव विषयसि
द्धिरिति भावः । ननु बाध्यबाधकभाव एव वैपरीत्येन कथं न भवति तत्राह भ्रांतार्थेति सदर्थविष
यत्वेन प्रमाणस्य बलवत्त्वात् । तत्त्वपक्षपातो हि धियां स्वभाव इति । अत्रोदाहरणमाह तत्र प्र
माणेनेत्यादिना । विपर्ययवृत्तेरतिहेयत्वख्यापनायाह सेयमिति । पंचपर्वा या विद्या संसारा

पा०ज० नर्थबीजं साइयमेव मिथ्याज्ञानरूपावृत्तिरेव एतद्विशेष एवेति यावत्। अत इयं अवश्यं निरोद्धव्ये
॥२१॥ तिभावः। पर्वाणि गणयति। अविद्यास्मितेति। क्लेशाः॥ क्लेशाख्याः क्लेशदत्वादिसधर्म्यैः रागादी
नां मिथ्याज्ञानत्वाभावेपि अविद्ययानुगतत्वादविद्यापर्वत्वं विपर्ययत्वं च यथांकुरस्य बीजपर्वत्वं
21 बीजत्वं चेति बोध्यं। न च विद्याविपर्ययो मोह इति पर्याया॥ एवं च मतिमोहवृत्त्योरभेदात् कथं शा
तयोरमूढत्वं वृत्तीनामिति सिद्धांतो घटेतेति चेत् न धर्मधर्म्यभेदेनैवात्र वृत्तीनां विपर्ययादिरू
पविभागकरणात्। वक्ष्मातक्ष्मवृत्तयो विपर्ययादिमत्य एवेति। अयं तद्धेयत्वप्रतिपादनायाच
र्थसंज्ञापंचकं क्लेशानामाह। एत एवेति स्वसंज्ञाभिः स्वानुरूपसंज्ञाभिः। तथा च विष्णुपुराणं।
तमोमोहो महामोहस्तामिस्रो ह्यन्धसंज्ञकः। अविद्यापंचपर्वैषा प्रादुर्भूता महात्मन इति। ए एम०
तेषामेव च प्राधाविधो महामोहः तामिस्रोऽष्ट। दशधा तथा भवत्यन्धतामिस्र इति। अव्यक्त ॥२१॥

महदहंकारपंचतन्मात्रेषनात्मस्वष्टस्वात्मबुद्धिरविद्याश्चाष्टविधंतमः ज्ञानावरकत्वात्। एतास्वे
वदेहाद्यात्मबुद्धीनामंतर्भावः। देहादीनामेतदष्टककार्यत्वात्। शुक्तिरजतादिविपर्ययाणां तु सं
सारहेतुतयानात्रगणना॥ विपर्ययादिष्यतेबंध इति पूर्वकारिकया बंधहेतुविपर्ययस्यैव प्रकृ
तत्वादिति। मोहादिष्वप्येवंबोध्यं अष्टस्वणिमाद्यैश्वर्येष्वनात्मीयेष्वात्मीयबुद्धिरस्मितास्वत्वास्मि
तयोः पर्यायत्वात्। मैवचाष्टविषयकतयाअष्टविधोमोहोसमुच्यत उच्यते। शेषं पूर्ववत्। तथादृष्टा
नुश्रविकभेदेनदशसुशब्दादिविषयेषुरागोदशविधोमहामोहः। शेषं पूर्ववत्। तथाष्टैश्वर्य
स्यविषयदशकस्यचपरिपंथिनिद्वेषोष्टादशधातामिस्त्रः शेषं पूर्ववत्। तथाऐश्वर्याष्टकं विषय
दशकंचनंक्ष्यतीतिकल्पः॥ शब्दज्ञानानुपातीवस्तुशून्यः प्रत्ययोविकल्प इत्यर्थः॥ शब्दश्चशाश्वता
नंचतेअनुपातिनीयस्यसतथा तथाचतदुभयजनकः॥ सर्वदैवाधावाधकालाऽविशेषेणास्या

पा॰ ज॰ ॥२२॥ 22

णविशेषणार्थः ननु विकल्पस्य सवस्तुकत्वे प्रमाणेऽन्तर्भावः निर्वस्तुकत्वे तु विपर्ययेऽन्तर्भावः तृतीयप्र
कारासंभवात् इत्याशंकां परिहरन्नेव विशेषणयोर्व्यावृत्त्यमाह स्तनेति। उपारोहोऽप्रमाणको
घनन्तर्भावे हेतुर्वस्तुशून्यत्वेपीति। विपर्ययकोट्यनन्तर्भावे च हेतुः शब्दज्ञानेत्यादि। माहात्म्यं
पायार्थ्यं तथा च यथार्थशब्देन यथार्थज्ञानेन च या दृशो व्यवहारो भवति शब्दज्ञानरूपः ता
दृश एव व्यवहारो विकल्पादपि दृश्यते विवेकि नामपीत्यर्थः। विषयस्तु नैवं। वाधोत्तरं इदं रज
तमिति शब्दप्रत्यययोरभावादिति। एतेन विपर्ययलक्षणे शब्दज्ञानाननुपातित्वं विशेषणं देय
मिति भावः॥ विकल्पस्योदाहरणान्याह। तद्यथेत्यादिना। किं विशेष्यं केन विशेषणेन व्यपदिश्य
ते विशेष्यतेऽत्र सन्ताभेदान्नास्त्यत्र विकल्पज्ञाने विशेषणविशेष्यभावरूपोर्थ इत्यर्थः। व एम॰
स्तुशून्यत्वमुपपाद्य घनाद्द्ज्ञानानुपतित्वमुपपादयति। भवति चेति। चैत्रस्य गौरिति यथा ॥२२॥

र्थेशब्दवत् अत्रापि विशेष्यविशेषणभावव्यपदेशे सति तथा वृत्तिबोचोदिवेकि नामपि भवति
चेत्यर्थः। अन्यान्यप्युदाहरणानि आह तथेत्यादिना। शाब्दैः प्रतिषिद्धावस्तुभूताः सुखादयो ध
र्मा यत्रेति प्रतिषिद्धवस्तुधर्मो पुरुषः इयं वृत्तिरेकमुदाहरणं अभावस्याधिकरणमात्ररूपत्वं
धाराधेयभावविरहादिति। निःक्रियः पुरुष इत्यन्युदाहरणं। लौकिकमप्युदाहरणत्रयमाह। तिष्ठ
तीति वृत्तिबाणः स्थास्यति स्थित इति गतिनिवृत्तो गतिनिवृत्तिविषयकविकल्पे वर्त्तमानत्वादि
विशिष्टं स्थाधात्वर्थमात्रं पारमार्थिकतया प्रतीयते कर्तृत्वकर्तृत्वस्य वर्त्तमानत्वादिकं च प्रत्य
यत्र पार्थस्तु विकल्पित इत्यर्थः। बाणो गतिनिवृत्त्यनुकूलकृत्यभावादिति। उदाहरणान्तरमाह।
तथानुत्पत्तीत्यादिना। व्यवहार इति सं तेन अनुत्पत्तिर्धर्मो यस्येत्यनुत्पत्तिधर्मो पुरुषः स धर्मो
नुत्पन्निरूपधर्मो प्रमाणविपर्ययातिरिक्तायां विकल्पवृत्तो बहुवादि विप्रतिपत्तेस्तान्निरा

पा० ज० ॥२३॥

सायवदूत्युदाहरणानि। एवं खपुष्पशशशृंगादिप्रत्ययाअपि विकल्पमध्ये प्रवेशनीयाः। ख
पुष्पं नास्तीति प्रत्ययानुरोधेन तादृशप्रत्ययसिद्धेः। विकल्पप्रत्ययात्मके वैशेषिकेण स्वार्थज्ञा
नविशेषतयेष्टव्या एवाविशेषतस्तैर्मिथ्याज्ञानमध्ये ते प्रवेश्यंते अस्माभिस्तु सविक
ल्पनिर्विकल्परूपाभ्यां श्रुतिसिद्धियोगविभागापेक्षयाद्विः द्विं इष्यंत इति। अभावप्रत्ययालंब
नावृत्तिर्निद्रा निद्राया वृत्तित्वस्फुटीकरणाय पुनर्वृत्तिग्रहणं। जाग्रत्स्वप्नवृत्तीनामभावस्तस्य प्र
त्ययः प्रतिसंक्रमस्थानं कारणमिति यावत् तत्त्वचित्तसत्वाच्छादकं तमोद्रव्यं अंधकारादिवत् त
देवालंबनं विषयो यस्यास्तथा तादृशी वृत्तिर्निद्रेत्यर्थः। बुद्धिर्हि त्रिगुणा तया परा सत्वरजसी अभि
भूय समस्तकरणावरकतम आविर्भवति तदा मलिनस्य चित्तसत्वस्य तमआकारवृत्तिः स्व
पिमीत्याकारा जायते। स्वापश्चात्र जाग्रत्स्वप्नवृत्त्यभावः तां च निद्राख्यां वृत्तिं अबुध्यमानः पु

23

राम० ॥२३॥



